संस्कृत

याज्ञिक

क्र. नं. ७८

उत्सर्जनप्रयोगः

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

३७४५

(1)

श्रीगणेशाय नमः ॥ अथ उत्सर्जनप्रयोगः ॥ आचार्यः शिष्यसहितः प्राचीमुदीचीं वा दिशमुपनिष्क्र
म्य त्रय निर्मलाग्राहादिरहिता आपस्तत्समीपे शुचौ देशे दर्भासनो दर्भपाणिराचम्य प्राणानाय
म्य देशकालौ संकीर्त्य अधीतानां छंदसाम स्खलनोच्छ्वासादिजनितयामतानिरा
सेनाप्यायनद्वारा श्रीपरमेश्वरप्रीत्यर्थं एभिर्ब्राह्मणैः सह वेदोत्सर्जनाख्यं कर्म क
रिष्ये ॥ तदंगं गणपतिपूजनं आत्मशुद्ध्यर्थं भस्मगोमयमृत्तिकास्नानानि करिष्ये ॥
जलसमीपं गत्वा ॥ भस्मादाय ईशानाय नम इति शिरसि ॥ तत्पुरुषाय नम इति
मुखे ॥ अघोराय नम इति हृदये ॥ वामदेवाय नम इति गुह्ये ॥ सद्योजाताय नम इ
ति पादयोः ॥ अग्निरिति भस्म ॥ वायुरिति भस्म ॥ जलमिति भस्म ॥ स्थलमिति
भस्म ॥ व्योमेति भस्म ॥ सर्वं ह वा इदं भस्म ॥ मानस्तोके इति पठित्वा सर्वांगे भस्म
विलिप्य स्नात्वाचम्य ॥ गोमयस्नानं ॥ गायत्र्या गोमयमादाय ॥ गंधद्वारामि
ति च ॥ अग्रमग्रं चरंतीनामोषधीनां वने वने ॥ तासामृषभपत्नीनां पवित्रं का
यशोधनं ॥ तन्मे रोगांश्च शोकांश्च नुद गोमय सर्वदे इति पठित्वा शिरःप्रभृत्यंगानि

(2)

उ०प्र० विलिप्य स्नात्वाचम्य॥ ततोमृत्तिकास्नानं॥ अश्वक्रांतेइतिमृदमभिमंत्र्यमृदमिर्धेनुरिति
॥१॥ लोष्ठमादायसहस्रपरमेतिदूर्वामभिमंत्र्य॥ कांडात्कांडादितिदूर्वामादाय॥ यात्शतेनेति
दूर्वांमृदिप्रतिष्ठाप्य॥ मृत्तिकेहनमेपापमितिमृदमभिमंत्र्य॥ यतइंद्रभयामहे० स्व
स्तिदावि० स्वस्तिनइंद्रं० आपांतमन्यु० ब्रह्मजज्ञानं० स्योनापृथिवि इतिप्राच्यादिदि
क्चतुष्टये ऊर्ध्वमश्वेतिप्रतिदिशं लोष्ठमुत्क्षिप्य॥ गंधद्वारामित्यादित्यायदत्रोपि
त्वा॥ श्रीर्मेभजत्विति ललाटमालिप्य॥ अलक्ष्मीर्मेनश्यत्विति प्रदक्षिणं शिरो वि
लिप्य॥ विष्णुमुखाइतिमुखं॥ महांइंद्रइतिबाहू॥ सोमानंस्वरणइतिकुक्षी॥
शरीरंयज्ञशमलमितिशरीरं॥ चरणंपवित्रइतिचरणौविलिप्य॥ सजोषाइं
द्रसगणइतिमृच्छेषंशिरसिनिधाय॥ सुमित्रानइत्यद्भिरात्मानमासिच्य॥ दु
र्मित्रास्तस्मैभूयासुरितिद्विषंतंमनसाध्यायन्॥ भूमौनिक्षिपेत्॥ योस्मां
द्वेष्टीतिद्वितीयं॥ यंचवयंद्विष्मइतितृतीयंनिक्षिप्य॥ हिरण्यशृंगमितिवरुणं ॥१॥
प्रार्थ्य॥ तीक्ष्णदंष्ट्रमहाकाय० सागरस्यतुनिश्वासोदंडहस्तोसुरांतकः॥

(2A)

जगत्स्रष्टाजगन्मर्दीनमामित्वांसुरेश्वर ॥ इमंमंत्रंसमुच्चार्यतीर्थस्नानंसमाचरेत् ॥
अन्यथातत्फलस्यार्द्धंतीर्थेशोहरतिध्रुवंइतिवरूणंप्रार्थ्य ॥ इमंमेगंगेइतिपाणि
नोदकमाहृत्यऋतंचसत्यंचेतित्र्यारुयोस्तृचेनाघमर्षणमंत्रेणत्रीन्प्राणायामा
न्कृत्वासपवित्रैःपाणिभिरापोहिष्ठामयोभुवइतितिसृभिर्हिरण्यवर्णाःशुचयः
पावकाइतिचतसृभिःपवमानःसुवर्जनइतिचैतेनानुवाकेनसर्वमंत्रांतेएक
वारंस्नात्वाततोदेवान्ऋषीन्पितॄंश्चतर्पयित्वास्नानांगंदेवर्षिपितृतृप्त्यर्थंदे
वर्षिपितृतर्पणंकरिष्ये ॥ तांदेवांस्तर्पयामि ॥ भूर्देवांस्तर्पयामि ॥ भुवर्देवांस्त०
स्वर्देवांस्त० भूर्भुवःस्वर्देवांस्त० तान्ऋषींस्त० भुवऋषींस्त० स्वऋ
षींस्त० भूर्भुवःस्वऋषींस्त० तान्पितॄंस्त० भूःपितॄंस्त० भुवःपितॄंस्त०
स्वःपितॄंस्त० भूर्भुवःस्वःपितॄंस्तर्पयामि ॥ येन्मयादूषितंतोयंशारीरम
लसंभव ॥ तद्दोषपरिहारार्थंयक्ष्माणंतर्पयाम्यहं ॥ ततोबहिरागत्यान्योन्यस्मैद
र्भान्प्रयच्छंतःआद्विस्नोवाततोवस्त्रपरिधानादिवस्त्रपरिधानादिकुर्युः ॥ ततो

Rajwade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan Mumbai

उ॰ प्र॰
॥२॥
(3)

पंचगव्यंप्राश्य॥ आचार्यः शिष्यादिभिः सहप्राङ्मुखउपवित्र्याचम्य दर्भपाणिःउत्सर्जनां
गं देवर्षिपितृतर्पणं करिष्य इति संकल्प्य देवर्षिपितृतर्पणार्थं चतुरस्त्रां प्राक्प्रवणां च वेदिं
कुर्यात्॥ तत्र प्राक्प्रवणे प्रागग्रैर्दर्भैरुदगपवर्गाण्यासनानि कल्पयंति॥ ब्रह्मणे आसनं
कल्पयामीत्येवं सर्वत्र॥ प्रजापतये॰ बृहस्पतये॰ अग्नये॰ वायवे॰ सूर्याय॰ चं
द्रमसे॰ नक्षत्रेभ्यः॰ इंद्राय राज्ञे॰ यमाय राज्ञे॰ वरुणाय राज्ञे॰ सोमाय राज्ञे॰ वैश्र
वणाय राज्ञे॰ वसुभ्यः॰ रुद्रेभ्यः॰ आदित्येभ्यः॰ विश्वेभ्यो देवेभ्यः॰ साध्येभ्यः॰ ऋ
भुभ्यः॰ भृगुभ्यः॰ मरुद्भ्यः॰ अथर्वभ्यः॰ अंगिरोभ्यः॰ इति त्रयोविंशति
मासनानि दत्वा॥ नीते निवीती॥ उदीचीनप्रवणे देशे उदक्प्राक्संस्थानि॥ विश्वा
मित्राय॰ जमदग्नये॰ भरद्वाजाय॰ गौतमाय॰ अत्रये॰ वसिष्ठाय॰ कश्यपाय॰
अनयोर्मध्ये अरुंधत्यै॥ इत्यष्टावासनानि देवेभ्यो दक्षिणतः प्राक्प्रवणे देशे प्रागग्रमा
सनं अगस्त्याय दत्वा॥ अगस्त्यासनादारभ्य प्राक्प्रवणस्थायामेकस्यां वेद्यां कृष्णद्वैपायनादि इतिहा
स पुराणांतेभ्य एकपंक्त्याशाह्ययः प्रागग्रैर्दर्भैरुदक्संस्थान्यासनानि कल्पयंति॥ कृष्णद्वैपाय
नाय॰ जातूकर्ण्याय॰ तरुक्षाय॰ तृणबिंदवे॰ वर्मिणे॰ वरूथिने॰ वाजिने॰ वाजश्रवसे॰ ॥२॥
सत्यश्रवसे॰ सुश्रवसे॰ सुतश्रवसे॰ सोमशुष्मायणाय॰ सत्ववते॰ बृहदुक्थाय॰ वाम

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com